# Narmadasahasranamastotram 2

# श्रीनर्मदासहस्रनामस्तोत्रम् २

## Document Information

Text title : Narmada Sahasranama Stotram 2

File name : narmadAsahasranAmastotram2.itx

Category : sahasranAma, devii, nadI, devI

Location : doc_devii

Latest update : January 13, 2024

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2024

*sanskritdocuments.org*

# श्रीनर्मदासहस्रनामस्तोत्रम् २

श्रीगणेशाय नमः ।
श्री गुरुभ्यो नमः ।
श्री नर्मदायै नमः ।
॥ अथ श्रीनर्मदासहस्रनाम प्रारम्भः ॥

तन्मे कथय
श्रीपार्वत्युवाच -
ॐ जगदीश जगद्धाम दिग्वासो मदनान्तक ।
रेवा नाम सहस्रन्तु कथयस्व मम प्रभो ॥ १॥

श्रीशिव उवाच -
साधुप्रिये महासाधो लोकानुग्रहकारिणी ।
नर्मदा महती माया सर्वसम्पत्तिकारिणी ॥ २॥

हारिणी सर्वमायानां संसारार्णवतारिणी ।
धारिणी सर्वविद्यानामविद्याभेदकारिणी ॥ ३॥

श्रीपार्वत्युवाच -
का तिथिः कस्तु वारश्च किं स्थलं पठने शुभम् ।
यस्य विज्ञानमात्रेण सर्वसिद्धिर्भवेन्नरः ॥ ४॥

तन्मे कथय देवेश सर्वलोकोपकारकम् ।
श्रीशिव उवाच -
न योगं करणं वारं नक्षत्रं नापि सङ्क्रमम् ॥ ५॥

यस्य पठन मात्रेण सद्यः सिद्धिं लभेन्नरः (सिद्धिर्भवेन्नरं) ।
नर्मदा सततं रक्षेज्जननी जगदम्बिका ॥ ६॥

ॐ अस्य श्री नाम रेवायाः सहस्रं परिकीर्तितम् ।
ऋषी रुद्रो विराडेषच्छन्दो निगदितो मया ॥ ७॥

धर्मार्थ-काम-मोक्षार्थे विनियोगः प्रकीर्तितः ।
रुद्रः शिरो मुखे छन्दो हृदये देवता स्मृता ॥ ८॥

ॐ नर्मदायै विद्महे मेकलकन्यायै धीमहि ।
तन्नो रेवा प्रचोदयात् । ॐ ह्रीं श्री नर्मदायै स्वाहा ॥

इति गायत्रीमन्त्रं यथाशक्ति जपित्वा सहस्रनाम पाठं कुर्यात् ।
तद्यथा-

अथ सहस्रनामस्तोत्रम् ।
ॐ नर्मदा नागकन्या च नागेशी नागवल्लभा ।
नारायणी निराकारा निरालम्बा निरञ्जनी ॥ ९॥

निरीहा निर्विकारा च नित्यानन्द स्वरूपिणी ।
निस्पृहा नित्यरूपा च निर्लोभा निश्चयात्मिका ॥ १०॥

नक्रेशी नागगमनी नागकन्या नगेश्वरी ।
निर्दोषा निर्झरा नीरा निरीहा नित्यनन्दिनी ॥ ११॥

निश्चया निश्चला नीला निर्लेपा निधनेश्वरी ।
नलनीलविलासा च नारायणपरायणा ॥ १२॥

निर्जरा नाकगमनी नक्षत्रा नेत्रवर्धिनी ।
निर्भरा निर्मला नेत्रा निश्शङ्का निर्जरात्मिका ॥ १३॥

नीपप्रिया नीपरता निष्कलङ्का गणेश्वरी ॥

नाशिनी सर्वशत्रूणां नूतना नूतनेश्वरी ॥ १४॥

निषङ्गधारिणी नीवा निर्धमा नखवर्धिनी ।
नदी मन्दाकिनी नाम मानरूपा नरातिहा ॥ १५॥

नरकासुरनाशी च नरेशी नरपालिनी ।
नरेन्द्रमानिनी निद्रानिग्रहा निग्रहेश्वरी ॥ १६॥

नटिनी नाटिनी नाट्या निर्द्दढा निर्द्दढेश्वरी ।
नितम्बिनी नितम्बी च निर्धना धनवर्धिनी ॥ १७॥

निर्धूता निर्दया दुष्टा निष्ठुरा नैककामगा ।
नभोरूपा नभेशी च नागरी नागरात्मिका ॥ १८॥

नरनीतिप्रिया नेमी निर्भीका निष्कलेश्वरी ।

नरेशपालिनी नौका नागस्था नागपार्श्विनी ॥ १९॥

नागेन्द्रमानिनी नद्या नदेशी नर्मभाषिणी ।
परमा परमेशी च पाकशासन पोषिणी ॥ २०॥

पवित्रा पावनी पद्मा पादुका पदकेचरी ॥ २१॥

पोषिणी पोषिका पोषा पूर्विका पूर्वमम्बिका ।
पञ्चमी पञ्चितप्रेमा पाञ्चाली परमेश्वरी ॥ २२॥

पक्षधारा च पक्षेशी पक्षिणी पक्षिरूपधृक् ।
पक्षिपालनसम्प्रीता पक्षिणी परमात्मिका ॥ २३॥

पञ्जरी पिञ्जरी पिङ्गा पिङ्गला पिकवल्लभा ।
पिकरूपधरा पित्रा पिकेशी पिकभाषिणी ॥ २४॥

प्रभाकारा प्रभारूपा प्रगल्भा पाकशासिनी ।
पशुप्रीता पशुरता पुरन्दरहितैषिणी ॥ २५॥

पुरुहूतप्रिया पद्मा पद्ममालाविभूषणा ।
पापसन्त्रासिनी पापोत्पाटिनी पङ्कजेश्वरी ॥ २६॥

पङ्कजाक्षी परभूतिः पथिनी पथिरक्षिणी ।
पथिप्रिया पथिरता परसम्मोहकारिणी ॥ २७॥

परेशी परहन्त्री च परब्रह्मस्वरूपिणी ।
पराचाररता पापा पद्माक्षी पद्मवल्लभा ॥ २८॥

पाठिनी सर्वविद्यानां पापपाशविनाशिनी ।
पटुप्रीता पाठरता पण्डिताबुद्धिवर्धिनी (द्धिनी) ॥ २९॥

पुण्डरीकविशालाक्षी पुण्ड्रधारणपुण्डिणी ।
पूतना पुत्रपाली च पुरुषार्थप्रसाधिनी ॥ ३०॥

पदस्था पापदमनी पादपङ्कजसेविता ।
फलदा फलरूपा च फलेशी फलवर्धिनी ॥ ३१॥

फुङ्कारी फणिपाली च फणेशी पन्नगेश्वरी ।
फूत्कारी फलदा फेकी फलेशी फलपोषिणी ॥ ३२॥

फटाकारा फणादर्शी फल्गुनी फलसाधिनी ।

फल्गुनी फाल्गुनप्रीता फल्गुः फल्गुफलात्मिका ॥ ३३॥

फूङ्कारी फलदात्री च निःस्फुलिङ्गा स्फुलिङ्गिनी ।
बालिका बालिकामाला बाला बुद्धिविवर्धिनी ॥ ३४॥

वरदा वररूपा च वरमाता वरेश्वरी ।
बगला वाग्विलासी च वाचनी वचनप्रिया ॥ ३५॥

वत्सला वत्सलेशी च वज्रिणी वज्रधारिणी ।
बालिका बालिकावस्था बाहुदण्डविलासिनी ॥ ३६॥

बाहुनी बाहुवरदा वर्तिनी वर्तुला बला ।
वीथिनी विधिका वीचि विकटा विकटेश्वरी ॥ ३७॥

ब्रह्मरूपा विष्णुप्रीता ब्रह्मविष्णुशिवात्मिका ।
वराक्षी वामना वामा वामिका वरदायिका ॥ ३८॥

ब्राह्मी बाला वराहीच वराक्षी विकृतानना ।
वसिष्ठा वादिनी वाक्या वाद्यरूपा वरेश्वरी ॥ ३९॥

बषङ्कारा वकेशी च बकदाल्भ्यपालिका ।
वागुरी विकसद्वक्रा वक्रिणी वक्रकारिणी ॥ ४०॥

वक्ररूपा वक्रधरा वक्रेशी वक्रभाषिणी ।
व्यक्ताऽव्यक्ताच बलदा बलेशा ब्रह्मचारिणी ॥ ४१॥

बदराश्रमसंस्था च बदराश्रमवासिनी ।
बदरीफलसन्तुष्टा बदरी बदरीश्वरी ॥ ४२॥

बदरीफलसन्दोहा बदरीफलभाविनी ।
बदरीफलसम्पूज्या बदरीफलतोषिता ॥ ४३॥

बदरीफलसंस्नेहा बदरीफलभाविनी ।
वरदा वरदेशी च वसिष्ठाद्यैस्सुपूजिता ॥ ४४॥

विश्वामित्रसदापाली विश्वम्भरी विचक्षणी ।
विश्वम्भरा विश्वरूपा विश्वात्मा विश्वपालिनी ॥ ४५॥

विश्वेशी विश्वहन्त्री च विश्वात्मा विश्वपोषिणी ।
वीरहा विरता वीरा बिभीषणवरप्रदा ॥ ४६॥

विश्वामित्रबृहत्स्नेहा विश्वहा विश्वरूपिणी ।
भवानी भूतभव्या च भवपाशविमोचनी ॥ ४७॥

भोगिनी भोगकारी च भोगदा भोगवर्धिनी ।
भीषणा भीषणेशी च भीमा भीमपराक्रमा ॥ ४८॥

भिक्षुकापालिनी भूति भूधरा भूधरात्मजा ।
भूषणा भूतपाली च भूजेशी भोगनायिनी ॥ ४९॥

भूतात्मा भूतसंरक्षी भूतिदा भूतिभूषणा ।
भवदा भवहन्त्री च भवशोक विनाशिनी ॥ ५०॥

भ्रामरी भ्रमराकारा भूतभावनभाविनी ।
भारद्वाजसदापूज्या भूषिता भूषितेश्वरी ॥ ५१॥

भक्षिणी भल्लुका भीषा भैरवी भवनाशिनी ।
भानुपूज्या भानुरता भवानी भुवनेश्वरी ॥ ५२॥

भूतला भूतलेशी च भूतली भूतलात्मिका ।
भोगिनी भोगदात्री च भोगदा भोगवर्धिनी ॥ ५३॥

भगात्मिका भगवती भगेशी भगपूजिता ।
भास्करी भास्करप्रीता भास्वती भासकारिणी ॥ ५४॥

भाषणी भाषिणी भामा भजनी भवरूपधृक् ।
भट्टिनी भट्टसम्पूज्या भट्टानां बुद्धिवर्धिनी ॥ ५५॥

भूपश्रीर्भूपसंरक्षी भूपात्मा भूपपालिका ।
भूपसाक्षी भूपरता भूमिपा भूमिधारिणी ॥ ५६॥

भूमिभोगरता माया भौमपूज्यासनातनी ।
भूमिदा भूमिजननी भूमिस्थिता भयापहा ॥ ५७॥

भावुका भवनाशा च भूरिदा भूमिपालिका ।
भुवना भुवनेशा च भुवनैकसुपालिका ॥ ५९॥

भूरिपूजारता नित्या भूरिदा भूरिभोगिनी ।
भूतनाथसदाप्रीता भूतनाथसुपूजिता ॥ ६०॥

भूतनाथसदापाली भूतनाथप्रहर्षिणी ।
भैरवप्रीतिमापन्ना भैरवानन्दवर्धिनी ॥ ६१॥

भिक्षुपाली भिक्षुकेशी भिक्षुदा भिक्षुरक्षिणी ।
भेदकारी च भेदेशी भीतिदा भीतिघातिनी ॥ ६२॥

भीतिरक्षाकरिताम्बा भीतिरूपा भयात्मिका ।
भस्मचन्दनसंयुक्ता भालरक्षा च भालिनी ॥ ६३॥

भालप्रीतिकरी भल्ला भल्लान्तकविदारिणी ।
मोहिनी मेहनेशा च महिला मदनासुरा ॥ ६४॥

महामाया महादेवी महामोहविनाशिनी ।
महायोगरता रेवा मदिरा मदिरेक्षणा ॥ ६५॥

मखरूपा मखेशी च मखगा मखधारिणी ।
मानिनी मानदा मान्या मोहरात्रि महेश्वरी ॥ ६६॥

मार्गणी मार्गणप्रीता मार्गदा मार्गरक्षिणी ।
मन्त्ररूपा मन्त्रकरी मञ्चाली मञ्चलेश्वरी ॥ ६७॥

मोक्षदा मोहदात्री च मोक्षहा मोक्षकारिणी ।
मत्सरा मत्सरप्रीता मत्सरात्मा मखान्तकृत् ॥ ६८॥

मार्जनी मार्जनरता मार्जना मार्जनेश्वरी ।
मिहिका मेढ्रिणी मेहा मेढ्रा मेढ्रविवर्धनी ॥ ६९॥

मनोरूपा मनस्था च मानसी मनमोहिनी ।
मनस्विनी मनस्थैर्या मानका मानमानिनी ॥ ७०॥

मनोरूपा मानभावा मानभावविदारिणी ।
मन्त्रिणी मन्त्रमाया च मन्त्रात्मा मन्त्रपालिनी ॥ ७१॥

मन्त्रहा मन्त्रसम्प्रीता मान्त्रिकी मन्त्रकारिणी ।
मखेशी मखकारी च मखरूपा मखेश्वरी ॥ ७२॥

मन्थिनी मन्थनाधीशा मन्थने शस्यपालिका ।
मदना मदरूपा च मदहा मदभञ्जनी ॥ ७३॥

मेदुरा मेदुराक्षी च मेदुरात्मा मदेश्वरी ।
माररूपा मारकारी मार्तण्डी मारवर्धिनी ॥ ७४॥

मारशान्तिकरी माया मानसैका मनस्विनी ।

मङ्गला मङ्गलाकारा मङ्गलात्मा महासुरी ॥ ७५॥

मध्यनीलम्बमध्यस्था मध्यमा मध्यरक्षिणी ।
महती मञ्जना मोटा मटका मरटात्मिका ॥ ७६॥

मलहा मलविध्वंसा मलसन्तोषकारिणी ।
जननी च जगद्धात्री जाह्नवी जगदम्बिका ॥ ७७॥

योगमाया जगज्जेत्री जनित्री जननी जरा ।
जठरा योगसिद्धा च योगाक्षी योगवर्धिनी ॥ ७८॥

योगसंरक्षिणी योग्या योगिनां गतिदायिनी ।
योगसंरक्षणप्रीता जगत्त्रयविहारिणी ॥ ७९॥

योगरक्षाकरी योग्या योगसम्मोहकारिणी ।
योगिनी योगिसंसेव्या योगहा योगपालिका ॥ ८०॥

जगदात्मा जगद्रूपा जगन्ती जगती जगत् ।
जघना जघनेशी च यक्षिणी यक्षपालिका ॥ ८१॥

यक्षसम्मोहनिरता यक्षात्मा यक्षभेदिनी ।
त्र्यक्षरी त्र्यक्षरेशी च यक्षदा यक्षकारिणी ॥ ८४॥

यक्षदा यक्षमाता च यक्षसम्प्रीतिवर्धिनी ।
जगद्धात्री जगज्जेत्री जयकृत् जयदायिनी ॥ ८३॥

यमुना यमुनापाली यमशङ्कानिवारिणी ।
योगेशी योगमाया च जाह्नवी जठरात्मिका ॥ ८४॥

यन्त्ररूपा यन्त्रमयी जनभक्तिविवर्धिनी ।
जनेशी जनसंरक्षी जानकी जगदम्बिका ॥ ८५॥

युद्धनियुद्धप्रीता च युद्धभक्तिप्रवर्धिनी ।
योधनि योधसम्प्रीता युद्धकार्यप्रदर्शिनी ॥ ८६॥

युद्धारिर्युद्धमाता च युद्धात्मा युद्धभाविनी ।
जगद्रञ्जनकारी च जनता जनकात्मिका ॥ ८७॥

योगरूपा योगधरा योगिनी योगमानिनी ।
जयरूपा जयमयी जयात्मा जयनेश्वरी ॥ ८८॥

जयहा जयसंरक्षी जयसम्मोहधारिणी ।
जीवन्ती युवतिर्जीवा जीवनी जीवरक्षिका ॥ ८९॥

जीवपाली जीवभेदी जीवहा जीवपालिका ।
जीवेशी जीवसम्मोहा जीवकौतुकधारिणी ॥ ९०॥

जीवना जीवनारम्भा जीवनी जगदूहिनी ।
रमणी रङ्किणी रेवा रेणुका रणरक्षिणी ॥ ९१॥

राजकर्मरताऽनन्ता रक्षणा रक्षणेश्वरी ।
रक्षिका राक्षसाभक्ष्या राक्षसादिविमर्दिनी ॥ ९२॥

रोगहा रोगकारी च रोगात्मा रोगनाशिनी ।
रघुराजसदापूज्या रघुवंशविवर्धिनी ॥ ९३॥

रामकार्यकरी रामा रामराज्यप्रतिष्ठिता ।
रमणी रामणी राज्ञी राज्यश्री राज्यभञ्जिनी ॥ ९४॥

रक्षिणी रक्षिकारक्षा रक्षेशी रक्षणात्मिका ।
राजकी राजिका राज्या राजयोगविलासिनी ॥ ९५॥

रथिनी रथसम्प्रीता रथात्मा रथकारिणी ।
रतिरूपा रूपधारी रूपात्मा रूपधारिणी ॥ ९६॥

रूपहा रूपसम्भेदी रूपाक्षी रूपकारिका ।
राकापतिसदाभीता राकापतिविभेदिनी ॥ ९७॥

राकापतिसदालीना राकापतिसुपूजिता ।
रासभी रासभप्रोता रासभा रासमण्डिनी ॥ ९८॥

राजकेलीसमाक्रान्ता रामराज्यप्रतिष्ठिता ।
रञ्जनी रङ्गरूपा च राहुधर्मकरी सदा ॥ ९९॥

राहुशीर्षच्छिदा रोहा राहुरूपप्रधर्षिणी ।
रमणी रेवती रम्या रोहिणी रतिभोगिनी ॥ १००॥

रतिपूज्यतमा लोके रतिमानविभेदिनी ।
लोलाक्षी लक्षणा लक्ष्मी लोकपाला लकावली ॥ १०१॥

लङ्कापाली च लङ्केशी लोकालोकप्रपूजिता ।
लोलेक्षणा लोमपाली लोमेशी लोकपालिका ॥ १०२॥

लाक्षा लाक्षारुणा लक्षा लक्षणा लक्ष्यगोचरी ।
ललिताङ्गी लोलरतिर्लीलाबालविहारिणी ॥ १०३॥

लालसारुणलिप्ताङ्गी लालिता लालनेश्वरी ।
लोकेशी लोकपाली च लोकात्मा लोकरक्षिणी ॥ १०४॥

लोकस्था लोकसाक्षी च लोकालोकविलासिनी ।
रोचनी रोचना लोला लीलालास्यविहारिणी ॥ १०५॥

लक्षणा लक्षिता लक्ष्या लक्षग्रहविनाशिनी ।
लज्जामयी लोकलज्जा लज्जोत्पत्तिप्रचारिणी ॥ १०६॥

लोपामुद्रा लोमकी च लिप्सा चोल्लिप्सिता सदा ॥

लवणाब्धितरी लङ्का लङ्केशी लङ्कपालिका ॥ १०७॥

लोभदा लोभहन्त्री च लोभमोहप्रहारिणी ।
लोभशान्तिकरीमन्त्रा लोमेशी लोमशात्मिका ॥ १०८॥

लालसावर्धिनी लास्या लक्षिका लक्ष्यदायिनी ।
वन्तिकावरदप्रोक्ता वीर्यदा वीर्यवर्धिनी ॥ १०९॥

विकलावस्थिनी वन्ध्या वन्दनप्रियवन्दना ।
वासिता वासितागारा विफला व्योमधारिणी ॥ ११०॥

सावित्री शारदा सन्ध्या शाम्भवी शाङ्करी शिवा ।
सुकेशी शोभना सौम्या सात्विकी सत्यधारिणी ॥ १११॥

सत्या सत्यात्मिका शेषा राका शशिस्वरात्मिका ।
शोकदा शोकनाशी च शोकहा शोकवर्धिनी ॥ ११२॥

सगुणा शोकहन्त्री च साक्षिणी सूक्ष्मरूपभाक् ।
स्वक्षा स्वक्षविनिक्षिप्ता शिञ्जना शिञ्जनावती ॥ ११३॥

शाटिनी शाटशुभ्रा च शौरेयी शेखरेश्वरी ।
सत्यहा सत्यपाली च शत्रुहा शत्रुनाशिनी ॥ ११४॥

शत्रुसम्मोहिनी सत्या शत्रूणां बुद्धिनाशिनी ।
सुस्थला सुस्थली स्वस्था सुन्दरी सुन्दरा सदा ॥ ११५॥

सुधना शुद्धमानस्या सुधार्णवनिवासिनी ।
सुधासागरसम्भूता सुधाशी शुद्धचन्द्रिका ॥ ११६॥

शून्यरूपा शून्यमयी शून्याशून्यनिवासिनी ।
सर्पभूषा सर्पधरी सपेशी सर्पहारिणी ॥ ११७॥

स्वप्नावती सुषुप्तिस्था सर्वस्था सर्वपालिनी ।
सर्वाङ्गी साधुशीला च सुशीला सुलभावती ॥ ११८।
सफला शोभना शोभा सुभामा शुभगा शुभा ।
सोमोद्भवा सोमसुता सोमात्मा सोमकन्यका ॥ ११९॥

सोमजा समता सोमा सौम्या सौम्यविहारिणी ।
सुराज्य सुरता सूर्या सुरेशी सुरतिः स्वरा ॥ १२०॥

सुरात्मजा सुरसुता सुरथा शूरवर्धिनी ।
शूलहा शूलभृच्छूलभित्शूलधृताम्बरा ॥ १२१॥

शूलजा शूलजा शूला सुशिला च सुलोचना ।
शर्वरी शर्वरप्रीता शयना शयनेश्वरी ॥ १२२॥

सहजा सिंल्हिका सिंही सिंहिका सिंहपालिनी ।
खड्गिनी खड्गिका खड्गी खगेशी खगगामिनी ॥ १२३॥

खलघ्नी खलसम्मोहा खलरूपा खलप्रिया ।
खलजा साधुशीला च शबरी शबरात्मिका ॥ १२४॥

शाङ्करी शङ्करप्रीता शङ्करप्रियकारिका ।
सौन्दरी सुन्दरी सौधा सुधासिन्धुनिवासिनी ॥ १२५॥

सर्वदा सर्वमान्या च सर्वात्मा सर्वभोगिनी ।
सवरा सर्वदा सर्वा सर्वस्था सर्वभूषणी ॥ १२६॥

सर्वारूढा सुवार्ता च सुवार्तावचनेश्वरी ।
साक्षिणी धर्मसेतूनां साधिनी सर्वकर्मणाम् ॥ १२७॥

सुप्ता सुप्तोत्थिता श्यामा श्यामला सौख्यकारिणी ।
सौख्यदा सौख्यपाली च सौख्यघ्ना सौख्यभोगिणी ॥ १२८॥

सुदती सुमुखी स्मेरा सुवासा शरदम्बिका ।
सरिता शारदा सौरा सौरेयी सोमकारिणी ॥ १२९॥

सुवचास्सुखदा स्वक्षा स्वक्षणी स्वक्षणेश्वरी ।
हासिनी हर्षिणी हंसी हंसगा हंसधारिणी ॥ १३० ॥

हठिनी हर्षसंवर्धिर्हराहरविहारिणी ।
हनूमत्प्रीतीमापन्ना हरिरूपा हरिप्रिया ॥ १३१ ॥

हर्यक्षी हारिणी हन्त्री हेरम्बा हरवल्लभा ।
हृशिकेषि सदास्नेहा हलाहलविमर्दिनी ॥ १३२ ॥

हलहा हलरूपा च हरैका हरतोषिणी ।
पद्मिनी छेदनप्रीता छन्देशी छन्दकारिणी ॥ १३३ ॥

छलात्मा छलभैदी च क्षुद्रबुद्धिविनाशिनी ।
छत्रिणी छत्रदा छत्रा सुच्छत्रा छत्रकारिणी ॥ १३४ ॥

आदिरूपा आदिमाया आद्या अम्बा च अम्बरी ।
अक्षनीरक्षधारी च आदिशक्ति राजेश्वरी ॥ १३५ ॥

अजा च अजनी अम्बा अजात्मा अजपोषिणी ।
अट्टहासा अट्टरूपा अग्निस्था अग्निरूपिणी ॥ १३६ ॥

अवर्त्या अर्बुदा ओजा अशोका शोकहारिणी ।
आदिस्था अञ्जनी अञ्जा अजानेयाम्बिकाशिनी ॥ १३७ ॥

ईश्वरी ईशपाली च ईशाना ईशवासिनी ।
ईडा ईशविलासा च ईशस्था ईशपोषिणी ॥ १३८ ॥

ईतिदा ईतिहन्त्री च ईतिभीतिविमर्दिनी ।
उमा उमापतिप्रीता उमापतिविहारिणी ॥ १३९ ॥

ऐश्वर्य्यदायिन्यैश्वर्या एकात्मानेकसम्भवा ।
कलिका कामिनी कान्ता कामिनी कामभोगिनी ॥ १४० ॥

कौतुकी कमला काली कल्याणी कमलेश्वरी ।
काशी काञ्ची च कावेरी कैलासी केशवी कविः ॥ १४१ ॥

कामदा कान्तिदा कान्तिः कार्तिकी कृत्तिका क्रिया ।
कार्तवीर्यविलासा च कार्तवीर्यप्रबोधिनी ॥ १४२ ॥

कुरुक्षेत्रनिवासा च कुरुकुल्ला कपालिनी ।
कुमारी कुलजा कान्तिः कपाली केशपालिनी ॥ १४३ ॥

कौलिनी कञ्जधारी च कञ्जाक्षी कञ्जपालिनी ।
कञ्जपुष्पसदाप्रीता कज्जमालाविहारिणी ॥ १४४॥

कज्जस्था कञ्जिनी काया कायस्था कायसुन्दरी !
कामभोगसदाप्रीता कामिका कामसुन्दरी ॥ १४५॥

कामकेलीरतोन्मत्ता कामक्रीडाविहारिणी ।
कामिनी कामदात्री च कार्यदा कार्यवर्धिनी ॥ १४६॥

कोशा कोशी च कौशेयी कुटिला कुटिलेश्वरी ।
कुरूपा क्रूरगर्भा च क्रूरक्रीडा कपालिनी ॥ १४७॥

कामाख्या कौशिकप्रीता कोशला कोशपालिनी ।
कुचस्थाना कुचक्रूरा कवच्या कौञ्चदारिणी ॥ १४८॥

कुट्टिनी कुलजेशा च कौशिकागारवासिनी ।
कोपा कोपवती कुण्डा कुण्डलेशा च कुण्डली ॥ १४९॥

कुभोजनरता कुम्भा कुम्भिनी कुम्भगामिनी ।
कुधना क्रोधिनी क्रुद्धा कुशावर्तनिवासिनी ॥ १५०॥

कुमारी क्रूरगर्भा च क्रूराक्षी क्रूरपालिनी ।
कुञ्जरी कुञ्जरप्रीता कुञ्जपाली कुजार्तिहा ॥ १५१॥

कुजमाता च कौलीना कुलीना कुलभोजना ।
कामिका कामदा काली कालञ्जरनिवासिनी ॥ १५२॥

कुस्थला च कुदत्कारी कामदा कामवर्धिनी ।
खलिनी खलपाली च खलदा खलवर्धिनी ॥ १५३॥

खङ्गहस्ता च खङ्गशी खर्परी खर्परप्रिया ।
खट्वाङ्गधारिणी खङ्गा खगदा खगगामिनी ॥ १५४॥

खेचरी खेचरा खेमा खजानेया खगेश्वरी ।
खट्वाङ्गी खङ्गधारी च षण्मुखी षण्मुखप्रिया ॥ १५५॥

खरेशी खरभक्षी च खरदूषणमर्दिनी ।
गौरी गौराङ्गिनीगौरी गौरीगिरिवरात्मजा ॥ १५६॥

गिरीशतनया गौर्या गीर्द्धरी गीर्धरेश्वरी ।

गीर्वाणी गिरिजा गीर्ष्या गोष्पतिप्रेमवर्धिनी ॥ १५७॥

गिरीशवल्लभा गोत्रा गोत्रजा गोत्रपालिनी ।
गोत्रेशा गोपना गोपी गोपाली गोपवल्लभा ॥ १५८॥

गौतमी गारुडी गेया गौतमी गौतमप्रिया ।
गोदावरी च गण्डक्या गोकुला गोकुलाङ्गजा ॥ १५९॥

गणेशी गणपाली च गणहा गणतोषिणी ।
गणपूज्या गणध्वंसी गणमान्या गणेश्वरी ॥ १६०॥

गणघ्नी गणसन्तुष्टा गारुडी गरुडप्रिया ।
ग्रहेशी ग्रहमान्या च ग्रहपूज्या ग्रहेश्वरी ॥ १६१॥

ग्राहिणी ग्रहणा गेहा ग्रहेशा ग्रहवल्लभा ।
गोधा गोधामिनी गोपा गोपाली गिरिजेश्वरी ॥ १६२॥

गगना गगनेशा च गगनी गगनेश्वरी ।
गङ्गा गव्या च गायत्री गोधना गोधनेश्वरी ॥ १६३॥

गौणी गौणात्मिका गोत्रा गोत्रिणी गोत्रवर्धिनी ।
गोत्रदा गोत्रपाली च गोत्रघ्ना गोत्रवल्लभा ॥ १६४॥

गोरजा गोस्वरूपा च गोपाली गिरिकन्यका ।
गोत्रजा गोत्रसंवृद्धिर्गोधना गोधनप्रिया ॥ १६५॥

गोलगर्भनिवासा च गोलगर्भविमोचना ।
गोलगर्भमनस्स्नेहा गोलगर्भविमर्दिनी ॥ १६६॥

गर्भिणी गर्भवासिन्या क्रूरगर्भनिवारिणी ।
गर्भरूपा गर्भमयी गर्विणी गर्वमोचना ॥ १६७॥

गर्वहा गर्व्वहन्त्री च गर्वघ्नी गर्वपालिनी ।
गर्वेशी गर्वयोग्या च गर्वदा गर्वकारिणी ॥ १६८॥

गलगण्डविनाशा च गलगण्डविभेदनी ।
गलगण्डबहिस्स्था च गलगण्डोपकारिणी ॥ १६९॥

गोक्षणी गोजनिर्गुर्व्वी गुर्विणी गर्वमर्दिनी ।
गीताङ्गाना च गोलब्धिर्गोलेपी गोत्रजा ग्रहा ॥ १७०॥

घनेशी घनपाली च घनौघा घनवर्धिनी ।
घोषपाली च घोषेशी घोषहा घोषघातिनी ॥ १७१॥

घटस्था घटरूपा च घटेशी घटना घटा ।
घण्टानाद सदाप्रीता घण्टानादप्रतोषिणी ॥ १७२॥

घटिका घण्टिका घण्टा घण्टानादप्रहर्षिणी ।
घोटिनी घोटजा घोटा घोटकी घोटकप्रिया ॥ १७३॥

घनिनी घनरूपा च घनकेशी घनार्तिहा ।
घनदा घनसम्मोहा घनद्युतिर्घनप्रिया ॥ १७४॥

घर्मरूपा घर्मकरी घर्मदा घर्महारिणी ।
घर्मेशी घर्मसम्मोहा घनौधा घनवर्षिणी ॥ १७५॥

चन्द्रिका चन्द्रवदना चर्चिका चन्दनप्रिया ।
चन्डिका चण्डहन्त्री च चण्डी चण्डपराक्रमा ॥ १७६॥

चारुरूपा चारुमयी चतुरा चतुरानना ।
चित्रिणी चित्ररूपा च विचित्रा चित्रवल्लभा ॥ १७७॥

चखिनी च चखेशी च चारुवक्त्राब्जहामिनी ।
चूडामणिकरस्था च चूडामणिविभूषणा ॥ १७८॥

चार्वङ्गी चारुसर्वाङ्गी चचिनी चर्चनेश्वरी ।
चापिनी चापहस्ता च चापेशी चम्पकद्युतिः ॥ १७९॥

चम्पकपुष्पसम्प्रीता चम्पकेशी च चम्पिका ।
चपला चारुचार्वङ्गी चामीकरमहाद्युतिः ॥ १८०॥

चामीकरसदाप्रीता चामीकरविभूषणा ।
चामीकरमहाप्रेमा चम्पका चम्पकप्रिया ॥ १८१॥

चमरी चामरी चौरी चौराङ्गी चौरवर्धिनी ।
चारुचन्द्रकलायुक्ता चण्डमुण्डविनाशिनी ॥ १८२॥

चरेशी चररूपा च चर्चिनी चर्चनार्चिता ।
चारुचन्दनलिप्ताङ्गी चतुरा चतुरानना ॥ १८३॥

चलत्कुण्डलचिन्मौली चारुबाहुविलासिनी ।
चतुर्मुखा चतुर्वक्त्रा चतुर्बाहुश्चतुर्भुजा ॥ १८४॥

चक्रधरा च चक्राङ्गी चक्रहा चक्रभेदिनी ।
चकोरी चन्द्रिका स्नेहा चन्द्र कान्ति सदार्च्चिता ॥ १८५॥

छत्रिणी छत्ररूपा च छत्रणी छत्रपालिनी ।
छत्रेशी छत्रिका छत्रा छद्मना छद्मनप्रिया ॥ १८६॥

छागप्रिया छागभक्षा शोकहा शोकभेदिनी ।
शोकदा शोकहन्त्री च क्षेमङ्करी क्षरेश्वरी ॥ १८७॥

छलिनी छलरूपा च छत्रहा छत्रदायिनी ।
छटाकारा छन्नमुखी छदनी छदवल्लभा ॥ १८८॥

क्षणदा क्षणरूपा च क्षमदा क्षामसुन्दरी ।
क्षोभना क्षोभिनी क्षोभा क्षोभात्मा क्षोभकारिणी ॥ १८९॥

छजिनी छाजिनी छज्जा छटिनी छटना द्युतिः ।
क्षेपेशी क्षेपणी क्षेपा क्षपानाथसदाप्रिया ॥ १९०॥

क्षरेशी क्षरकारी च क्षपना क्षपिनी क्षपा ।
जननी च जगन्माता जनयित्री जराजया ॥ १९१॥

जनशोकहरी जन्या जनदा जनरञ्जनी ।
जयरूपा जगद्धात्री जर्जरा जर्जरेश्वरी ॥ १९२॥

जघना जघनी जङ्घा जघासुजङ्घवर्धिनी ।
यन्त्रिणी यन्त्ररूपा च जगदा जगदम्बिका ॥ १९३॥

योगमाया योगिनी च योगिनां बुद्धिदायिनी ।
जगज्जयन्ती जेत्रा च जाह्नवी जानकी जरा ॥ १९४॥

जठरा ज्येष्ठधान्या च जडेशी जडबुद्धिदा ।
जाड्यहा जाड्यध्वंसी च जाड्यसम्भेदकारिणी ॥ १९५॥

यज्ञरूपा च यज्ञाङ्गी यज्ञेशी जगदम्बिका ।
जारमार्गरता जारा जर्जरी जगन्मातृका ॥ १९६॥

जयिनी जृम्भणी जृम्भा यदुनाथविमोहिनी ।
यादवजीतिमापन्ना यद्वीशा यादवात्मजा ॥ १९७॥

यशोदा च यशःपाली यशोहा यशवर्धिनी ।

यशः क्षेमकरी योषा पोषिणी जगत्पालिनी ॥ १९८॥

जलदा जलसंवृष्टिर्जलधाराप्रहारिणी ।
जलेशी जलशय्या च जलसागरवासिनी ॥ १९९॥

जलसङ्क्षोभणी ज्येष्ठा ज्येष्ठेशा ज्येष्ठपालिनी ।
ज्येष्ठरूपा ज्येष्ठमयी ज्येष्ठसम्मोहकारिणी ॥ २००॥

भूर्भूरिणी भूरिभूषा भूपेशा भूपरूपिणी ।
भूपपाली च भूपेशी भूपप्रीता भूपप्रिया ॥ २०१॥

टङ्किनी टङ्करूपा च टङ्कात्मा टङ्कनेश्वरी ।
टोपा टोपायनी टेरा टौरिका टारटारिणी ॥ २०२॥

टासन्जा टाटिनी टौरा टामरप्रियकारिका ।
टोरा टट्टाट्टहासा च ठमिनि ठम्भठम्भिनी ॥ २०३॥

डण्डिनी डण्डधारी च डण्डेशी डमरात्मिका ।
डाकिनी डामरी दण्डी डेरेका डामरप्रिया ॥ २०४॥

ढक्का सङ्क्षोभिनी ढौरा ढुण्डिराजसदाप्रिया ।
ढुण्डिराजप्रहर्षा च ढुण्डिराजप्रपूजिता ॥ २०५॥

नारायणी नरेन्द्राणी निरीहा नरकार्तिहा ।
निशुम्भशुम्भमथिनी नरकासुरघातिनी ॥ २०६॥

नित्यानन्दा नरेशाना निर्विकारा निरञ्जनी ।
निर्लोपा निर्लया नीला नारिकेलफलप्रिया ॥ २०७॥

नाकिनी नाकशयना नीरवाहा नरप्रिया ।
निर्भासा नूतनानन्दा नन्दिकेशप्रपूजिता ॥ २०८॥

नन्दिकेश्वरसम्मोहा नन्दिकेश्वरपूजिनी ।
नौकासन्तारिणी नीला नासिकाग्रसुगन्धिनी ॥ २०९॥

नागसन्धारिणी नग्ना नगेशी नगरेश्वरी ।
निःशङ्कनिकटा नारी नवीना नरपालिनी ॥ २१०॥

नरवाहनशोभाढया नखिनी नखधारिणी
तन्त्रिणी तन्त्रवाद्या च तारिका तारिकोत्तमा ॥ २११॥

तारा तरङ्गिणी तीरा ताटङ्की तटनीस्थली ।
तुळजा तोतला तुर्य्या तुरीया तरुणी त्वरा ॥ २१२॥

तारिणी तामसी तन्त्रा तन्त्रिका तमहारिणी ।
तुन्दरा तुकरूपा च तोषिणी त्रिगुणात्मिका ॥ २१३॥

तञ्चिनी तुच्छहन्त्री च निर्भूरा निजकारिणी ।
तपिनी तापिनी तापी तपेशी तपमानिनी ॥ २१४॥

तारुण्यतमहन्त्री च तमोहा तमभक्षिणी ।
स्तम्भिनी स्तम्भरूपा च स्थलिनी स्थलधारिणी ॥ २१५॥

स्थलेशी स्थलहारी च थर्थरा स्थलभोगिनी ।
दमनी सर्वशत्रूणां दमयन्ती दयार्णवी ॥ २१६॥

दुर्गा दुर्गतिहारी च दुर्गिणी दुर्गरूपिणी ।
दुरन्ता दुष्कृतिर्दूरा दुर्दरोद्धारकेश्वरी ॥ २१७॥

दुर्विनीता च दैत्यारिर्दानवानां विमर्दिनी ।
दुःखहा दुर्गरूपा च दुरन्ता दयिता दया ॥ २१८॥

दुर्भिक्षहारिणी दीर्घा दीर्घहा दीर्घलोचनी ।
द्विजरूपा द्विजप्रीता द्विजेशी द्विजपूजिता ॥ २१९॥

द्विजात्मा द्विजमान्या च द्विजविद्याविवर्धिनी ।
द्विरूपा दीर्घनयना दीर्घवक्रप्रकाशिनी ॥ २२०॥

दीर्घहस्ता दीर्घदेहा दीर्घहासा दृहासिनी ।
दुर्लभा दुर्भरा दूर्वा दुर्वासोमुनिपूजिता ॥ २२१॥

दण्डिनी दण्डरूपा च हेमदण्डसुधारिणी ।
दूती दुःस्थालिका दुर्गा दुर्दराधरधारिणी ॥ २२२॥

दानदा दानपूज्या च दानमानविलासिनी ।
द्युमणिस्तिमिरारिश्च दुःसहा दुःसहेश्वरी ॥ २२३॥

धामिनी धामपूज्या च धूमा धूम्राक्षहारिणी ।
ध्वजिनी ध्वजवाही च ध्वजात्मा ध्वजधारिणी ॥ २२४॥

धनदा धनपूज्या च धनहा धनवर्धिनी ।
धनेशपोषिणी धन्या धारिणी धनदेश्वरी ॥ २२५॥

धरणीधरमान्या च धरणीधरवल्लभी
धाराधरी जलधरी धरेशा धरणीधरा ॥ २२६॥

धूलिसम्मोहिनी धौरा धर्षणी धूमसी ध्वजा । ओं ।

इति नामसहस्रन्तु नर्मदायाः प्रकाशितम् ॥ २२७॥

ये पठन्ति महादेवि तेषां सिद्धिरनेकधा ।
प्रातःकाले पठेन्नित्यं धनधान्य समृद्धिमान् ॥ २२८॥

माध्याह्ने च पठेद्देवि ईप्सितं लभते क्षणात् ।
सायङ्काले पठेद्यस्तु सर्वकामार्थसिद्धये ॥ २२९॥

अर्धरात्रे विशेषण नर्मदाप्रियकारकम् ।
एकवारं पठेद्यस्तु सर्वबाधा विमोचयेत् ॥ २३०॥

द्विवारं च पठेन्नित्यं सर्वशत्रुविमर्दनम् ।
त्रिवारं तु पठेन्नित्यं सर्वरोगनिवारणम् ॥ २३१॥

चतुर्वारं पठेन्नित्यं चतुर्वेदाधिपी भवेत् ।
पञ्चवारं पठेन्नित्यं पञ्चभूतेश्वरी भवेत् ॥ २३२॥

षड्वारं च पठेन्नित्यं सर्वैश्वर्य्यत्वमेद्ध्रुवम् ।
सप्तवारं पठेन्नित्यं सम्भवेद्विजयी नरः ॥ २३३॥

अष्टवारं पठेन्नित्यमष्टासिद्धिमवाप्नुयात् ।
नववारं पठेद्यस्तु नवनाथसमद्युतिः ॥ २३४॥

दशवारं पठेन्नित्यं दशविद्यालभेत्स्वयम् ।
रुद्रवारं पठेद्यस्तु रुद्रतुल्यपराक्रमः ॥ २३५॥

विंशतिवारं पठेद्देवि सर्वदुःखनिवारणम् ।
त्रिंशद्वारं पठेद्यस्तु मुच्यते व्याधिबन्धनात् ॥ २३६॥

चत्वारिंशत्समावर्त्य कामुकी लभते स्त्रियम् ।
पञ्चाशद्वारमासाद्य कामकोटिविमोहितम् ॥ २३७॥

षष्ठिवारं पठेद्यस्तु स लभेदचलां श्रियम् ।
पठेत्सप्ततिवारं चेच्छत्रुहानिः प्रजायते ॥ २३८॥

पठेदशीतिवारं वै सभवेद्देवदुर्लभः ।
पठेन्नवतिवारं यः सभवेद्धनदोपमः ॥ २३९॥

शतावृत्तिपठेद्यस्तु मनोभिलषितं लभेत् ।
सहस्रावृत्तिपाठेन मुच्यते व्याधिबन्धनात् ॥ २४०॥

निशीथे नर्मदातीरे यः पठेच्छिवसन्निधौ ।
सहस्रावृत्तिपाठेन सर्वसिद्धि लभेन्नरः ॥ २४१॥

राजभ्रंशे महादुःखे दारिद्ये व्याधिसम्भवे ।
अयुतावृत्तिपाठेन गतराज्यमवाप्नुयात् ॥ २४२॥

दुष्टग्रहविनाशं च अयुतावृत्तिपाठतः ।
शिवगेहे रिपोर्भङ्गे श्रीकामे विष्णुमन्दिरे ॥ २४३॥

अश्वत्थे राजवश्यार्थे कन्यार्थे चण्डिकागृहे ।
जले स्वरूपकामी हि राज्यार्थे सरितस्तटे ॥ २४४॥

विद्यार्थे ब्रह्मवृक्षे च रोगे चारण्ययोगकः ।
यं यं कामयते काममयुतावृत्तिपाठतः ॥ २४५॥

तं तं प्राप्नोति देवेशि नान्यथा वचनं मम ।
प्रतिमा मर्चयेद्धीमान्स पुष्पबिल्वपत्रकैः ॥ २४६॥

तस्य सिद्धिरनेकस्था सर्वसौभाग्यसम्पदा ।
दारिद्य नश्यते सर्वं नर्मदायाः प्रसादतः ॥ २४७॥

नान्यदेवी नान्यदेवी नान्यदेवी महीतले ।
नर्मदा सदृशा लोके न गङ्गापि वरानने ॥ २४८॥

नर्मदा नर्मदा सर्वमनोरथान्ददाति वै ।
कलौ तु नर्मदा देवी कल्पवृक्षी भनार्तिहा ॥ २४९॥

तस्या वै स्तोत्रपाठेन भवन्ति सफलाः क्रियाः ।
तस्मात्सर्वप्रयत्नेन नर्मदा सेवनं कुरु ॥ २५०॥

ऐश्वर्यदात्री जनदुःखहन्त्री
पापान्विहन्त्री विमलाच्चितश्रीः ।
शिवात्मिका लोकपदस्थिता त्वं
श्रीनर्मदे देवि मम प्रसीद ॥ २५१॥

श्रीनर्मदे देवि मम प्रसीद । देवि मम प्रसीद ।

हरिः ॐ तत्सदिति श्री भवानीतन्त्रे हरगौरी संवादे
अक्षरादिनर्मदासहस्रनामस्तोत्रं सम्पूर्णम् ।
श्रीनर्मदागजाननार्पणमस्तु ।

*Narmadasahasranamastotram 2*

pdf was typeset on January 13, 2024

Please send corrections to *sanskrit@cheerful.com*